*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 3, January – February 2026*

# महाभारते राजधर्मस्य मानवकल्याणस्य च विकाशः तथा प्रभावः

*SK RABIUL*

*Ph.D Reserch Scholar, Department of Sanskrit, University of Calcutta*

*Email: rabiulgp1114@gmail.com*

**सारांशः**- भारतं महान् देशः अस्ति, अस्य प्राचीनता च समग्रविश्वे प्रसिद्धा अस्ति।महाभारतं प्राचीनभारतीयराजनीतिविचाराणां अध्ययनस्य एकं महत्त्वपूर्णं स्रोतः अस्ति। महाभारतस्य शान्तिपर्वे राजशास्त्रं, राजधर्मः (राज्ञः कर्तव्याः), शासनव्यवस्था, मन्त्रिपरिषद् तथा करव्यवस्था इत्यादिषु विषयेषु बहवः महत्त्वपूर्णाः विचाराः निहिताः सन्ति। तत्र राज्ञः कर्तव्याणि शासनस्य विविधांशाश्च विस्तरेण वर्णिताः सन्ति। अपि च राजसत्तायाः महत्त्वं प्रतिपाद्यः राजवंशस्य उत्पत्तेः विषये महत्त्वपूर्णाः सिद्धान्ताः स्थापिताः सन्ति। महाभारते शान्तिपर्वात् अतिरिक्तं सभापर्वणः पञ्चमे अध्याये आदर्शराज्यव्यवस्थायाः स्वरूपं वर्णितम् अस्ति। महाभारतम् प्राचीनभारतीयराजनीतिचिन्तनस्य विश्वे महत्त्वपूर्णं स्थानम् अस्ति। प्राचीनभारतीयचिन्तकाः धार्मिकञ्च, राजनीतिकञ्च, सांस्कृतिकञ्च, दार्शनिकञ्च तथा सामाजिकविषयेषु गभीरं चिन्तनम् अकुर्वन्। सहस्रवर्षपर्यन्तं गतस्यापि अनन्तरं तेषां चिन्तनानि अद्यापि राजनीतिक-धार्मिक-सामाजिकमार्गदर्शकरूपेण कार्यं कुर्वन्ति।

एतेषु प्राचीनभारतीयचिन्तकेषु कृष्णद्वैपायनवेदव्यासकृतं महाभारतम् अद्वितीयम् अस्ति। अतः एतत् "पञ्चमवेदः" इति नाम्ना प्रसिद्धम् अस्ति। मानवजीवनस्य आध्यात्मिकः, सामाजिकः, व्यवहारिकः, ऐतिहासिकः तथा राजनैतिकः एतेषु सर्वेषु क्षेत्रेषु यत्र जनकल्याणं कर्तव्यनिर्देशनं च दृश्यते, तेषां सर्वेषां तत्त्वानां विवेचनं महाभारते सर्वत्र विखण्डितरूपेण दृश्यते।

**मूलशव्दः**- महाभारतम्, राजधर्मः, जनकल्याणं, शान्तिपर्वः, मनवजीवनम्।

कृष्णद्वैपायनव्यासविरचितं महाभारतं प्राचीनभारतीयसाहित्यस्य बृहत्तमं ग्रन्थं च जगत्प्रसिद्धग्रन्थेषु अन्यतमम् अस्ति। अस्मिन् महाभारते भारतवर्षस्य आचारव्यवहाराः वर्णिताः सन्ति। साहित्यं समाजश्च परस्परं परस्परेण सह सम्बन्धितौ स्तः।। सत्साहित्यं यत्र समाजं प्रेरयति, तथैव दुष्टसाहित्यं समाजं विपथं नयति। अतः साहित्यस्य समाजे महद् प्रभावः अस्ति। अस्मिन् विशालमहाभारते भारतस्य धार्मिकाः, सामाजिकाः, सांस्कृतिकाः, राजनैतिकाः, आर्थिकाः च पक्षाः अतीव सुन्दररूपेण निरूपिताः सन्ति। एतत् महाभारतं केवलं भूतकालस्य तदानीन्तनघटनाः न सूचयति, अपि तु वर्तमानमपि सम्यक् मार्गदर्शयति, भविष्येऽपि अस्य प्रासङ्गिकता पर्याप्ता अस्ति। महर्षिः वेदव्यासः महाभारतविषये यथार्थमेव उक्तवान्—

"धर्मे चार्थे च कामे च मोक्षे च भारतर्षभ।

यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित्[1]"॥

[1] महाभारतम् १/२/३९०, १८/५/४९

अतः उच्यते— यत् महाभारते नास्ति, तत् भारतवर्षेऽपि नास्ति। अतः स्वाभाविकमेव महाभारते सर्वे विषयाः सूक्ष्मतया विवेचिताः इति वक्तुं न आवश्यकम्। अस्माकं विषयः अस्ति महाभारते राजधर्मस्य तथा मानवकल्याणस्य च विकाशः तथा प्रभावः।

राजधर्मस्य शाब्दिकार्थः भवति राज्ञः धर्मः अर्थात् राज्ञः कर्त्तव्यम्। राजधर्मे राज्ञः समग्रकर्तव्यः, शासन-सम्बद्धविषयः सम्मिलितः अस्ति। महाभारते राजा मनुष्यरूपेण देवतासदृशः मन्यते, तथा च एषा भावना स्वीकृता यत् केवलं राजा एव प्रजानां मानसिकविकासस्य, सदिच्छायाः, मानस्य तथा लाभस्य कारणं भवति। मनोः मते राज्ञः सुखे लक्ष्मीः वसति, तस्य पराक्रमे विजयः, तथा तस्य क्रोधे मृत्युः निवसति। यतः राजपदस्य राज्यस्य च मध्ये कश्चित् भेदः नास्ति, अतः राज्ञः धर्मः वा कर्तव्यं एव राजधर्मः इति उच्यते। राजधर्मे राज्ञः कर्त्तव्यनिष्ठः अधिकारः, शासनं चालयितुम् आवश्यकम् अङ्गम्, आचारः, व्यवहारः, नियमः, गुणः, दोषः, प्रायश्चित्तादीनां समावेशः भवति। महाभारते राजधर्मः एका "संसाररूपीसागरम् अतिक्रमणकारिणी नौका इति भीष्मः कथयति। धर्मशास्त्रम् नौकां रज्जुरूपेण बध्नाति। या रज्जुः त्यागरूपीपवनप्रवाहेण स्खलिता भवति। प्राचीनभारतीयवर्णव्यवस्थायां केवलमात्रं क्षत्रियः हि शासकः रूपेण राज्यं परिचालितवानिति हेतोः राजधर्मः क्षात्रधर्मः इति उच्यते । राजधर्मस्य किम् आशयः अस्ति? अस्य अनुपालनं कदा सुनिश्चितं भवति? अस्य प्रत्यक्ष-परोक्षं प्रतिफलं किम् अस्ति? यः ग्रन्थः समकालीनसमाजे राज्यशास्त्रानुवर्तिनां कृते प्रेरणास्रोतः तथा मार्गदर्शनस्य सिद्धान्तं प्रस्तौति। महाभारतस्य शान्तिपर्वणि युधिष्ठिरः भीष्मपितामहात् जिज्ञासां कृतवान्—

''राज्ञां वै परमो धर्म इति धर्मविदो विदुः।
महान्मेतं भारः च मन्ये तद् ब्रूहि पार्थिव[2]''॥

राजधर्मः सम्पूर्णस्य जीवजगतः आश्रयः अस्ति। राज्ञः धर्मेषु धर्मार्थकामानां त्रयाणां समावेशः अस्ति। न केवलम्, अपितु मोक्षधर्मोऽपि राजधर्मे निहितः अस्ति। संसारं मर्यादायां स्थापयितुं राजधर्मः प्रमुखं साधनम् अस्ति। अतः भवान् सर्वप्रथमं मम कृते राजधर्मस्य एव वर्णनं कृतम्।

''राजधर्मान् विशेषेण कथयस्व पितामह।
सर्वस्य जीवलोकस्य राजधर्मः परायणम्[3]''॥

युधिष्ठिरस्य उक्तप्रश्नस्य उत्तररूपेण भीष्मः पितामहः सर्वप्रथमम् उक्तवान्—

''आदावेव कुरुश्रेष्ठ राजा रञ्जनकाम्यया
देवतानां द्विजानां च वर्तितव्यं यथा विधि[4]''॥

यद्यपि कार्यसिद्धौ प्रारब्धं पुरुषार्थश्च एतौ द्वौ सामान्यकारणत्वेन स्वीकृतौ, तथापि अहं पुरुषार्थमेव प्रमुखं मन्ये। प्रारब्धं तु पूर्वमेव निश्चितम् अस्ति। पुरुषार्थ एव राज्ञां सर्वोत्तमा नीतिः अस्ति, तथा सत्यात् विना अन्यत्

[2] महाभारतम् , शान्तिपर्वः ५६/२
[3] महाभरतम् , शान्तिपर्वः ५६/३
[4] महाभारतम् , शान्तिपर्वः ५६/१२

किमपि वस्तु राज्ञां कृते हितकरं न भवति। न केवलम् एतत्, अपि तु स्वीयं छिद्रं, स्वीयां मन्त्रणां, स्वीयं कार्यकौशलं च विहाय अन्येषु सर्वेषु कार्येषु आवश्यकतानुसारं सरलता तथा कोमलता अवलम्बनीया। यथा ग्रीष्मकाले सूर्यः न अत्यधिकं शीतलं ददाति, न च अत्यधिकं तापं करोति, तथा एव राजा अपि न अति-कोमलः भवेत्, न च अति-कठोरः भवेत्।

राज्ञां धर्मः गर्भवत्याः स्त्रियाः धार्मिकताया सदृशी भवेत्। यथा गर्भवती स्त्री केवलं गर्भस्थबालकस्य हितमेव ध्यानं करोति, तथैव राजा अपि प्रजाजनानां हितमेव ध्यानं करोतु।

राजस्वस्य रक्षणार्थं राजा दण्डं दातुं न संकोचं कुर्यात्। सेवकैः सह परिहासादिषु संयमः धारयितव्यः। राजा यदा सर्वेभ्यः यथायोग्यं विभागं ददाति, मन्त्रिणां अनादरं न करोति, दुष्टपुरुषान् दण्डयति, तदा तस्य एतत् कर्म "राजधर्मः" इति कथ्यते। राजा यदा मनसा, वाचा, कर्मणा च सर्वेषां रक्षणं करोति, पुत्रस्य अपि अपराधं न क्षमते, दुर्बलानां आवश्यकतानुसारं वस्तूनि ददाति, व्यापारीणां पुत्रवत् रक्षणं करोति, मित्राणां वृद्धिं करोति, शत्रूणां नाशं साधयति, साधुपुरुषान् आदरात् सत्कारं करोति, भूदानं करोति, प्रेमपूर्वकं सत्यपालनं करोति— तदा एषः राज्ञः धर्मः इति कथ्यते।

उपर्युक्तवर्णनात् एतत् स्पष्टं भवति यत् राजधर्मस्य वास्तविकः उद्देश्यः कल्याणकरणम् अस्ति— तत् कल्याणं यत् सामाजिकसौहार्दे, आध्यात्मिकोन्नतौ, मानवीयप्रेम्णि च पूर्णतया आधारितम् अस्ति।

युधिष्ठिरेण राजधर्मपालने अनिच्छायाः विरोधे भगवान् श्रीकृष्णः पितामहं भीष्मं माध्यमं कृत्वा राजधर्मं, आपद्धर्मं तथा मोक्षधर्मणां विस्तृतज्ञानप्रदानाय प्रेरणां दत्तवान्। पितामहः भीष्मः स्वसमयस्य पूर्वपरम्परया प्रचलितानां ऋषि-मुनीनां संवादेषु, आख्यानोपाख्यानरूपेण निबद्धं राजनीतिधर्मदर्शनसम्बद्धं ज्ञानं उपदिष्टवान्।

"चतुर्ष्वार्णाश्रमधर्मेषु योऽर्थः सः हृदि स्थितः।

राजधर्मांश्च सकलानवगच्छामि केशव[5]॥"

इति उक्त्वा पितामहः भीष्मः युधिष्ठिरस्य राजधर्मविषयकजिज्ञासां तृप्तुं राजधर्मस्य प्रधानस्वरूपं तथा प्रशासनिकतत्त्वानि दृष्टान्तपूर्वकं विस्तरेण उपदिष्टवान्, यस्य संक्षिप्तविवरणम् अत्र प्रस्तुतम् अस्ति। राज्ञा राजधर्मस्य सम्यक् अनुपालनार्थं राज्यस्य सप्ताङ्गसिद्धान्तस्य विवेकपूर्णप्रयोगः अपेक्षितः भवति।

"प्रणेयं राजधर्माणां प्रब्रूहि भरतर्षभ[6]।"

पितामहः भीष्मः राजधर्मं सर्वेषां धर्माणां मध्ये श्रेष्ठतमं मन्यते, यतः राजधर्मस्य सम्यक् पालनद्वारा एव चातुर्वर्ण्यस्य सुरक्षा सुनिश्चितं भवति। प्राचीनैः ऋषिभिः तथा ब्रह्मज्ञैः उपदिष्टं त्यागधर्मं सर्वोत्तमं मन्यमानाः तं राजधर्मानुशासने अन्तर्निहितं कृतवन्तः।

"सर्वे धर्मा राजधर्मप्रधानाः, सर्वे वर्णाः पाल्यमाना भवन्ति।

---

[5] महाभारत् , शान्तिपर्वः ५४/२१
[6] महाभारतम् , शान्तिपर्वः १२०/२

सर्वत्यागो राजधर्मेषु राजं, त्यागं धर्मं प्राहुरग्र्यं पुराणम्[7]"॥

राजधर्मपालनं बाहुबलसम्पन्नेन शक्तिशालिना व्यक्तिना एव कर्तुं शक्यते। यतः चातुर्वर्ण्यव्यवस्थायां ब्राह्मणवैश्यशूद्रवर्णानां स्वधर्मरक्षणस्य दायित्वं राजधर्मेण एव सुरक्षितं भवति, अतः त्रिवर्णसहितं प्राणिमात्रस्य रक्षणं कुर्वतां क्षत्रियाणां कृते लोके श्रेष्ठतमो धर्मः राजधर्म एव अस्ति।

"बाह्वायत्तं क्षत्रियैर्मानवाणां लोकश्रेष्ठं धर्ममासेवमानैः।

रक्षणं सर्वभूतानामिति क्षात्रं परं मतम्।

तद् यथा रक्षणं कुर्यात् तथा शृणु महीयते[8]॥"

पितामहः भीष्मः राज्ञः कृते अवलम्बनीयानि तीक्ष्णता, कुटिलता, अभयदानम्, सत्यं, सरलता तथा श्रेष्ठभावादीनां गुणानां नियमितपालनम् अपेक्षितवान्। राज्ञा उग्रता, दयालुता, मौनम्, मधुरवचनम्, सौम्यता, शास्त्रज्ञानम् इत्यादीनि नानारूपाणि समये समये प्रकटनीयानि।

"तैक्ष्ण्यं जिह्मत्वमादालभ्यं सत्यमार्जवमेव च।

बहुरूपस्य राज्ञो हि सूक्ष्मोऽप्यर्थो न सीदति[9]॥"

राजा अपराधिनां अपराधस्वभावानुसारं दण्डं निर्धारयितुम् अर्हति। राजा स्वसैनिकबलरूपेण दण्डेन देवता-असुर-यक्ष-ऋषि-पितृ-महापुरुष-साधु-पशुपक्षिसहितस्य समग्रस्य प्राणिजगतः परमकल्याणस्य साधनं भवति। एषः दण्डः एव समग्रसृष्टेः आधारः अस्ति, यतः एषः दण्डः परमात्मनः एव एकं रूपम् अस्ति।

'ईश्वरश्च महादण्डो डण्डे सर्वं प्रतिष्ठितम्[10]'।

सर्वशक्तिसम्पन्नः राजा स्वशत्रुषु प्रति सदा कठोरः भवेत्। सः शत्रुपक्षस्य सर्वान् दोषान् ज्ञात्वा तान् उद्घाटयेत्, तथा शत्रुपक्षस्य मित्राणि स्वपक्षे आनयितुं प्रयत्नं कुर्यात्। स्वस्य सैन्यशक्तिं वर्धयित्वा शत्रून् आक्रम्य तेषां समूलनाशं कुर्यात्। एतेन राज्ञः प्रभावः क्रमशः वर्धते। – 'दोषान् विवृणुयाच्छत्रोः परपक्षान् विधूनयेत[11]'। राजकार्यस्य सम्यक् संचालनार्थं योग्याः मन्त्रिणः, अमात्याः तथा कुशलाः रणनीतिकाराः अतीव महत्वपूर्णाः भवन्ति। अतः राजा स्वकार्यसिद्ध्यर्थं विधिसम्मतान्, योग्याः, बुद्धिमन्तः, सद्गुणसम्पन्नान् मन्त्रिणः अनुसृत्य निर्णयं कुर्यात्।

''आत्मसंयमनं बुद्ध्या परबुद्ध्यावधारणम्।

बुद्ध्या चात्मगुण प्राप्तिरेतच्छास्त्रनिदर्शनम्[12]'' ॥

---

[7] महाभारत्, शान्तिपर्वः ६३/२७
[8] महाभारतम्, शान्तिपर्वः १२०/३
[9] महाभारतम्, शान्तिपर्वः १२०/५
[10] महाभारतम्, शान्तिपर्वः १२१/१
[11] महाभारतम्, शान्तिपर्वः १२०/११
[12] महाभारतम्, शान्तिपर्वः १२०/१८

राज्ञा स्वराज्यकार्यस्य निष्पादनार्थं मृदुस्वभावान्, विदुषः तथा शक्तिसम्पन्नान् व्यक्तीन् स्वसेनायाः अभिवृद्ध्यर्थं नियुक्तान् कर्तव्यान्। यथा वीणावाद्ययन्त्रस्य सप्तस्वराणां अनुसरणं क्रियते, तथा एव राज्ञा स्वाधीनस्थकर्मचारिणः तथा अधिकारिणः योग्यताधारितेषु कार्येषु नियुक्त्य सम्यक् सद्भावः धारयितव्यः।

''मृदुशीलं तथा प्राज्ञं शूर चार्थविधानवित्।

स्वकर्मणि नियुञ्जीत ये चान्ये च बलाधिकाः[13]''॥

कुलीनान्, धर्मज्ञान्, मृदुभाषिणः, कलङ्करहितान्, शिक्षितान्, जितेन्द्रियान्, गोपनीयकार्येषु सिद्धहस्तान् व्यक्तीन् एव चयनं कर्तव्यम्। सम्यक् अनुशीलनेन नियुक्तगुप्तचराणां साहाय्येन स्वराज्यस्य तथा शत्रुपक्षस्य गूढगतिविधीनां ज्ञानं प्राप्य तदनुसारं सावधानतया राजा स्वकार्याणां आरम्भं समापनं च कुर्यात्।

''युक्तः समनुतिष्ठेत तुष्टश्चारैरुपस्कृतः।

चरान् स्वनुचरान् विघात् तथा बुद्धया स्वयं चरेत्[14]''॥

राजा स्वीयगुप्तचरैः राज्यस्य गूढगतिविधीन् ज्ञात्वा स्वविवेकपूर्वकं निर्णयं कुर्यात्। हर्षः, विषादः तथा अमर्षः एतेषां सम्यक् संयमं कृत्वा स्वकर्तव्ये निरतः राजपुरुषः पृथिव्याः राज्यलक्ष्मीं प्राप्नोति। यः राजा प्रजायाः अनुग्रह-निग्रहयोः समभावेन परीक्षणं करोति तथा सदा स्वयं प्रजायाः राज्यस्य च रक्षणं करोति, सः विद्वान् धर्माश्रयी राजा सम्पूर्णराजधर्मेण युक्तं भवति।

''आत्मप्रत्यय कोशस्य वसुदैव वसुन्धरा।

व्यक्तश्चानुग्रहो यस्य यथार्थश्चापि निग्रहः।

गुप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्मवित्[15]''॥

राज्ञा राज्यव्यवस्थायाः समुचितसंचालनार्थं करसंग्रहद्वारा राजकोषवृद्धिं कर्तव्या। सः प्रजाभ्यः धनं, धान्यं, रत्नं, श्रमादीनि अल्परूपेण गृह्णीयात्। एतत् तादृशं भवेत् यथा मधुमक्षिका अनेकपुष्पेभ्यः अल्पमल्पं परागं संगृह्णाति—तथा एव प्रजासु करभारः नाधिकः भवेत्। स्वीयां करनीतिं गुप्तां कृत्वा यथा गोपालकः गाम् पालनं कृत्वा पञ्चगव्यं लभते, तथा राजा अपि स्वशासितभूमेः सम्यक् रक्षणं कृत्वा तस्याः अन्तर्बाह्यसंपदः, खनिजानि, पदार्थानि, रत्नानि च उपभुङ्क्ते।

''कालं प्राप्योपादद्यान्नाथं राजा प्रसूचयंत्।

अहन्यहनि संदुहयान्महीं गामीव बुद्धिमान्[16]''॥

[13] महाभारतम्, शान्तिपर्वः १२०/२३
[14] महाभारतम्, शान्तिपर्वः १२०/३२
[15] महाभारतम्, शान्तिपर्वः १२०/३१
[16] महाभारतम्, शान्तिपर्वः १२०/३३

**सामाजिकविकासः** – अस्माकं देशस्य जनानां कृते सामाजिकन्यायस्य प्रावधानं संविधानं एव निहितम् अस्ति। शताब्द्यः यावत् प्राचीनदारिद्र्यस्य तथा भेदभावपूर्णायाः सामाजिकव्यवस्थायाः कारणात् पिछडवर्गाणां दुर्बलवर्गाः सामाजिकान्यायस्य शिकाराः भवन्ति। यदि वयं सामाजिकविकासस्य विषये चिन्तयामः, तर्हि जातिपाति तथा ऊचनीचभावः कदापि न द्रष्टव्यः। अद्यतनसमाजे कतिपयेषु स्थानेषु जातिनिर्णयः अत्यन्तं दुर्लभः अस्ति। अस्माकं देशस्य बहुव-प्रदेशेषु उच्चजातीयाः जनाः नीचजातीयान् जनान् हीनदृष्ट्या पश्यन्ति। यदि वयं समाजस्य विकासं कर्तुम् इच्छामः, तर्हि एतेभ्यः भेदभावेभ्यः मुक्ताः भवितुम् आवश्यकम्, तथा मानवजातेः हिताय निर्विशेषभावेन अग्रे गन्तव्यम्। तदैव समाजस्य विकासः सम्भवति।

अन्ते अहं वक्तुम् शक्नोमि यत् शासनं, प्रशासनं, राजनीतिकजीवनं, शिक्षां इत्यादिषु पिछडजातीनां प्रतिनिधित्वं न्यूनम् अस्ति, यत् तान् राष्ट्रीयधारायाः अङ्गं कृत्वा निवारयितुं शक्यते। तेषां प्रतिनिधित्वं दत्त्वा तान् विकासमार्गे अग्रे नेतुं शक्यते। समाजवादीसमाजः सर्वेषां सह सद्भावेन निर्मीयते तथा विकसितो भवति। एते जनाः समाजे सम्मानपूर्वकं जीवितुं शक्नुवन्ति, उच्चस्थाने स्थितुं शक्नुवन्ति, तथा समाजे समानता स्थापयितुं आवश्यकानि पदानि गृह्यानि।

**उपसंहारः** – एवं प्रकारेण महाभारत-महाकाव्यस्य द्वादशे महापर्वे शान्तिपर्वे पितामहः भीष्मः स्वकालपर्यन्तं प्रचलितान् तथा आद्यऋषिभिः मनीषिभिश्च उपदिष्टान् राजनैतिककर्तव्यान्, विचारान्, व्यवहारान् च सुप्रसिद्धराज्यस्य सिद्धान्तान्तरगतं उपदिष्टवान्। राजा, मन्त्री, राज्यं, पुरं, बलं (दण्डः, सेना), कोशः तथा मित्रम्— एतेषां संघटनानां माध्यमेन राजधर्मस्य सम्यक् प्रयोगेन सम्पूर्णायाः पृथिव्याः कल्याणं सुनिश्चितं भवति। पितामहभीष्मेन एतेषां राज्याङ्गानां विधिवत् उपदेशः कृतः। तेन धर्मराजं युधिष्ठिरः स्वोपदिष्टस्य राजधर्मस्य पालनार्थं प्रेरितः, तथा स्वराजकर्तव्यानां समुचितनिर्वहनाय आदेशः दत्तः। एवं प्रकारेण राजधर्मानुकूलं आचरणं कुर्वन् राजा स्वां समग्रां भूमिं तथा समस्तां प्रजां च सह दीर्घकालं सुखपूर्वकं भोगान् उपभुङ्क्ते, जीवनस्य अन्ते च परमपदं प्राप्नोति। अतः राजधर्मः एव अस्य सम्पूर्णस्य चराचरजगतः मूलधर्मः अस्ति, तस्मिन्नेव सम्पूर्णं जगत् समाहितम् अस्ति। — सर्वो हि लोको नृप धर्ममूलः[17]।

## ग्रन्थसन्दर्भः


- Bandapadhy, Dhirendranath. Saṃskṛta Sāhityera Itihas. Kolkatta. Swarasati Press Limited. 2008. (1st Edition July 1988), (2nd Edition 8th Mudran August 2018).
- Badrinath, Chaturvedi. The Mahābhārata: An Inquiry in the Human.
- Chaitanya Krishna ( K.K Nair). The Mahābhārata, A Literary Study, Clrion Books, New Delhi 1985.
- Mahābhāratam. Edited by Haridas Sidhanta Bagish Bhattacharyya. Kolkatta: Biswabani Prakasan. 1422 Bangabda, 3rd Edition, 1345 Bangabda 1st Edition.
- Mahābhāratam. Edited by Ram Narayan Shastri. Garkhpur. Geeta Press. 1965.
- Pandey, P. Rajdharma In Mahābhārata: Vid Special Reference to Shanti Parba. DK Printbolt (P) Limited.
- Ṛkveda Saṃhita. Edited by F. Maxmuller ( with sāyaṇabhāṣya). Delhi: Rastriya Sanskrit Sangsthan. 2006. Re-print.


[17] महाभारतम् , शान्तिपर्व १२०/५६